# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (एकादश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥श्रीदुर्गासप्तशती ॥

॥ अथ एकादशोऽध्यायः ॥

। ध्यानम् ।

ॐ बालरविद्युतिमिन्दुकिरीटां(न्) तुङ्गकुचां(न्) नयनत्रययुक्ताम् ।

स्मेरमुखीं(वँ) वरदाङ्कुशपाशाभीतिकरां(म्) प्रभजे भुवनेशीम् ॥

ॐ ऋषिरुवाच ॥ 1॥

देव्या हते तत्र महासुरेन्द्रे,

सेन्द्राः(स्) सुरा वह्निपुरोगमास्ताम् ।

कात्यायनीं(न्) तुष्टुवुरिष्टलाभाद्,

विकाशिवक्त्राब्जविकाशिताशाः ॥ 2॥

देवि प्रपन्नार्तिहरे प्रसीद,

प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं(न्),
त्वमीश्वरी देवि चराचरस्य ॥ 3॥
आधारभूता जगतस्त्वमेका,
महीस्वरूपेण यतः(स्) स्थितासि ।
अपां(म्) स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥ 4॥

त्वं(वँ) वैष्णवी शक्तिरनन्तवीर्या,
विश्वस्य बीजं(म्) परमासि माया ।
सम्मोहितं(न्) देवि समस्तमेतत्,
त्वं(वँ) वै प्रसन्ना भुवि मुक्तिहेतुः ॥ 5॥

विद्याः(स्) समस्तास्तव देवि भेदाः(स्),
स्त्रियः(स्) समस्ताः(स्) सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्,
का ते स्तुतिः(स्) स्तव्यपरा परोक्तिः ॥ 6॥

सर्वभूता यदा देवी, भुक्तिमुक्तिप्रदायिनी ।
त्वं(म्) स्तुता स्तुतये का वा, भवन्तु परमोक्तयः ॥ 7॥

सर्वस्य बुद्धिरूपेण , जनस्य हृदि सं(म्)स्थिते ।
स्वर्गापवर्गदे देवि , नारायणि नमोऽस्तु ते ॥ 8॥

कलाकाष्ठादिरूपेण,  परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते,  नारायणि नमोऽस्तु ते ॥ 9॥

सर्वमङ्गलमाङ्गल्ये , शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि,  नारायणि नमोऽस्तु ते ॥ 10॥

सृष्टिस्थितिविनाशानां(म्),  शक्तिभूते सनातनि ।
गुणाश्रये गुणमये , नारायणि नमोऽस्तु ते ॥ 11॥

शरणागतदीनार्त- परित्राणपरायणे ।
सर्वस्यार्तिहरे देवि , नारायणि नमोऽस्तु ते ॥ 12॥

हं(म्)सयुक्तविमानस्थे,  ब्रह्माणीरूपधारिणि ।
कौशाम्भः क्षरिके देवि,  नारायणि नमोऽस्तु ते ॥ 13॥

त्रिशूलचन्द्राहिधरे,  महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण , नारायणि नमोऽस्तु ते ॥ 14॥

मयूरकुक्कुटवृते,  महाशक्तिधरेऽनघे ।
कौमारीरूपसं(म्)स्थाने,  नारायणि नमोऽस्तु ते ॥ 15॥

शङ्खचक्रगदाशार्ङ्ग- गृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे,  नारायणि नमोऽस्तु ते ॥ 16॥

गृहीतोग्रमहाचक्रे, दं(म्)ष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे, नारायणि नमोऽस्तु ते ॥ 17॥

नृसिं(म्)हरूपेणोग्रेण, हन्तुं(न्) दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते, नारायणि नमोऽस्तु ते ॥ 18॥

किरीटिनि महावज्रे, सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि, नारायणि नमोऽस्तु ते ॥ 19॥

शिवदूतीस्वरूपेण, हतदैत्यमहाबले ।
घोररूपे महारावे , नारायणि नमोऽस्तु ते ॥ 20॥

दं(म्)ष्ट्राकरालवदने, शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने, नारायणि नमोऽस्तु ते ॥ 21॥

लक्ष्मि लज्जे महाविद्ये, श्रद्धे पुष्टिस्वधे ध्रुवे ।
महारात्रि महाऽविद्ये, नारायणि नमोऽस्तु ते ॥ 22॥

मेधे सरस्वति वरे , भूति बाभ्रवि तामसि ।
नियते त्वं(म्) प्रसीदेशे, नारायणि नमोऽस्तु ते ॥ 23॥

सर्वस्वरूपे सर्वेशे, सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि , दुर्गे देवि नमोऽस्तु ते ॥ 24॥

एतत्ते वदनं(म्) सौम्यं(ल्ँ), लोचनत्रयभूषितम् ।
पातु नः(स्) सर्वभीतिभ्यः(ख्), कात्यायनि नमोऽस्तु ते ॥ 25॥

ज्वालाकरालमत्युग्र- मशेषासुरसूदनम् ।
त्रिशूलं(म्) पातु नो भीतेर्- भद्रकालि नमोऽस्तु ते ॥ 26॥

हिनस्ति दैत्यतेजां(म्)सि, स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि, पापेभ्योऽनः(स्) सुतानिव ॥ 27॥

असुरासृग्वसापङ्क- चर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु, चण्डिके त्वां(न्) नता वयम् ॥ 28॥

रोगानशेषानपहं(म्)सि तुष्टा,
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां(न्) न विपन्नराणां(न्),
त्वामाश्रिता ह्याश्रयतां(म्) प्रयान्ति ॥ 29॥

एतत्कृतं(यँ) यत्कदनं(न्) त्वयाद्य,
धर्मद्विषां(न्) देवि महासुराणाम् ।
रूपैरनेकैर्बहुधात्ममूर्तिं(ङ्),
कृत्वाम्बिके तत्प्रकरोति कान्या ॥ 30॥

विद्यासु शास्त्रेषु विवेकदीपेष्-
वाद्येषु वाक्येषु च का त्वदन्या ।

**ममत्वगर्तेऽतिमहान्धकारे,**
**विभ्रामयत्येतदतीव विश्वम् ॥ 31॥**

**रक्षां(म्)सि यत्रोग्रविषाश्च नागा,**
**यत्रारयो दस्युबलानि यत्र ।**
**दावानलो यत्र तथाब्धिमध्ये,**
**तत्र स्थिता त्वं(म्) परिपासि विश्वम् ॥ 32॥**

**विश्वेश्वरि त्वं(म्) परिपासि विश्वं(वँ),**
**विश्वात्मिका धारयसीति विश्वम् ।**
**विश्वेशवन्द्या भवती भवन्ति,**
**विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ 33॥**

**देवि प्रसीद परिपालय नोऽरिभीतेर्-**
**नित्यं(यँ) यथासुरवधादधुनैव सद्यः ।**
**पापानि सर्वजगतां(म्) प्रशमं(न्) नयाशु,**
**उत्पातपाकजनितां(म्)श्च महोपसर्गान् ॥ 34॥**

**प्रणतानां(म्) प्रसीद त्वं(न्), देवि विश्वार्तिहारिणि ।**
**त्रैलोक्यवासिनामीड्ये, लोकानां(वँ) वरदा भव ॥ 35॥**

**देव्युवाच ॥ 36॥**

**वरदाहं(म्) सुरगणा, वरं(यँ) यन्मनसेच्छथ ।**

तं(वँ) वृणुध्वं(म्) प्रयच्छामि, जगतामुपकारकम् ॥ 37॥

देवा ऊचुः ॥ 38॥

सर्वाबाधाप्रशमनं(न्), त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्य- मस्मद्वैरिविनाशनम् ॥ 39॥

देव्युवाच ॥ 40॥

वैवस्वतेऽन्तरे प्राप्ते, अष्टाविं(म्)शतिमे युगे ।
शुम्भो निशुम्भश्चैवान्या- वुत्पत्स्येते महासुरौ ॥ 41॥

नन्दगोपगृहे जाता, यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि, विन्ध्याचलनिवासिनी ॥ 42॥

पुनरप्यतिरौद्रेण , रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि, वैप्रचित्तां(म्)स्तु दानवान् ॥ 43॥

भक्षयन्त्याश्च तानुग्रान्, वैप्रचित्तान्महासुरान् ।
रक्ता दन्ता भविष्यन्ति, दाडिमीकुसुमोपमाः ॥ 44॥

ततो मां(न्) देवताः(स्) स्वर्गे , मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति, सततं(म्) रक्तदन्तिकाम् ॥ 45॥

भूयश्च शतवार्षिक्या- मनावृष्ट्यामनम्भसि ।

मुनिभिः(स्) सं(म्)स्मृता भूमौ , सम्भविष्याम्ययोनिजा ॥ 46॥

ततः(श्) शतेन नेत्राणां(न्), निरीक्षिष्यामि यन्मुनीन् ।
कीर्तयिष्यन्ति मनुजाः(श्), शताक्षीमिति मां(न्) ततः ॥ 47॥

ततोऽहमखिलं(ल्ँ) लोक- मात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः(श्) शाकै- रावृष्टेः(फ्) प्राणधारकैः ॥ 48॥

शाकम्भरीति विख्यातिं(न्), तदा यास्याम्यहं(म्) भुवि ।
तत्रैव च वधिष्यामि, दुर्गमाख्यं(म्) महासुरम् ॥ 49॥

दुर्गा देवीति विख्यातं(न्), तन्मे नाम भविष्यति ।
पुनश्चाहं(यँ) यदा भीमं(म्), रूपं(ङ्) कृत्वा हिमाचले ॥ 50॥

रक्षां(म्)सि भक्षयिष्यामि, मुनीनां(न्) त्राणकारणात् ।
तदा मां(म्) मुनयः(स्) सर्वे, स्तोष्यन्त्यानम्रमूर्तयः ॥ 51॥

भीमा देवीति विख्यातं(न्) तन्मे नाम भविष्यति ।
यदारुणाख्यस्त्रैलोक्ये, महाबाधां(ङ्) करिष्यति ॥ 52॥

तदाहं(म्) भ्रामरं(म्) रूपं(ङ्), कृत्वासङ्ख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय, वधिष्यामि महासुरम् ॥ 53॥

भ्रामरीति च मां(ल्ँ) लोकास्- तदा स्तोष्यन्ति सर्वतः ।

इत्थं(यँ) यदा यदा बाधा,  दानवोत्था भविष्यति ॥ 54॥

तदा तदावतीर्याहं(ङ्),  करिष्याम्यरिसङ्क्षयम् ॥ 55॥
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्याः स्तुतिर्नामैकादशोऽध्यायः ॥

उवाच 4, अर्धश्लोकः 1, श्लोकाः 50, एवम् 55, एवमादितः 630